In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi

॥ अग्निसहस्रनामस्तोत्रादिसंग्रहः ॥

रचयिता

दीक्षितदामोदरात्मजः सांबदीक्षितः

(वेदाचार्यः, व्याकरण विद्वान् हारीतः, गोकर्णं, काव्यतीर्थः)

अध्यापकः

मे. द. सं. विद्यापीठः

प्रकाशकः

आस्थानविद्वान् गणपतिशास्त्री गुणी,

नि. गो. सं. पाठशाला अध्यक्षः

श्रीजगद्गुरुश्रीकांचीकामकोटिपीठाधीश्वर-

श्रीचंद्रशेखरेन्द्रसरस्वतीश्रीस्वामिनां

चरणारविन्दयोः समर्पितम्

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

॥ श्री गुरुः शरणम् ॥

॥ समर्पणम् ॥

अग्निसहस्रनामस्तोत्रादिसाहित्यपुष्पगुच्छमिदं ज्योतिर्मयवपुषः साक्षा-
दिवमानुषभावंप्रपन्नवैश्वानर इवावस्थितानां स्वस्तिश्रीमदखिलभूमंड-
लालंकारत्रयस्त्रिंशत्कोटिदेवतासेवितश्रीमत्कांचीदेवीसनाथश्रीमदे-
काम्रनाथ श्रीमहादेवीसनाथश्रीहस्तिगिरिनाथसाक्षात्कार परमा-
धिष्ठान सत्यव्रतनामांकित कांचीदिव्यक्षेत्रे शारदामठसुस्थि-
तानाम्, अतुलितसुधारसमाधुर्य कमलासनकामिनी धमिल्ल
संफुल्लमल्लिकामालिकानिष्यन्द मकरंदझरीसौवस्तिक वाङ्-
निगुंभविजृंभणानन्दतुंदिलित मनीषिमंडलानाम्, अनव-
रताद्वैत विद्याविनोदरसिकानां निरंतरालंकृतीकृतशांतिदां-
तिभूम्नां सकलभुवनचक्रप्रतिष्ठापक श्रीचक्रप्रतिष्ठा-
विख्यात यशोलंकृतानां निखिलपाषण्डषण्डकण्टको-
त्पाटनेन विशदीकृतवेदवेदान्तमार्गषण्मतप्रतिष्ठा-
पकाचार्याणां श्रीमत्परमहंसपरिव्राजकाचार्यवर्य-
श्रीजगद्गुरु श्रीमच्छंकरभगवत्पादाचार्या-
णाम्, अधिष्ठाने सिंहासनेऽभिषिक्त श्री-
महादेवसरस्वतीसंयमीन्द्राणां अन्तेवा-
सिवर्य श्रीमच्चन्द्रशेखरेन्द्रसरस्वती-
यतिवर्याणां चरणारविन्दयोः
समर्प्य कृतार्थयति
आत्मानम्,

समर्पयिता, श्री गुरुचरणदासः
संत्रदीक्षितः, गोकर्णः

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।

युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥

विदितमस्तु ! तत्र भवतां वेदविदुषां साहित्यरसिकानां च—

यदहमाहिताग्नीनां हारीतानां वंशोद्भवः । बाल्ये तातपाद-सकाशादधिगवेदविद्यः ततश्च संस्कृतभाषाभ्यासेऽपि बद्धानुरागः अभवम् । किं तु ग्रन्थरचनाकृते यावदावश्यकं वैदग्ध्यं न हि तावन्मया समासादितं इति वक्तुं न जिहेमि, तथापि पांडित्या-दतिरिक्तसंस्कारविशेषः समुद्दिष्टदेवताचिन्तनेऽपि अनन्या श्रद्धा एतादृशस्तोत्रसाहित्यरचनाय मम बलमधात् । अतश्च अग्निसहस्रनाम-स्तोत्रप्रणयनात्पूर्वमेव श्रीगपतेर्वेदपादस्तवः, अन्ये च कतिपय देवता विषयकाः श्लोका मया विरचिताः । अत्र यौवनसहजचाप-लादेव प्रवृत्तोऽहं कृतिकार अस्मिन्व्यतिकरे दिव्यानुभावानां श्रीकाव्य-कंठगणपतिमुनीनां "इंद्रसहस्रनामस्तोत्रं दृष्टवान् । ततः संजात-प्रेरणया पारंपर्येण पूर्वपुरुषैरुपास्यमान अग्निदैवतमधिकृत्य ग्रंथोऽयं प्रणीतः । मन्ये महानुभावानामनुकृतिरेतादृशी मम तावत् धन्यतामेव-संपादयेत् न पुनरुपहास्यतां विदुषाम् इति ।

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अस्तु, प्रसंगवशात् तिरुपतिक्षेत्रंगतेन मया श्रीकांचीकामकोटिजगद्गुरु श्रीचंद्रशेखरेन्द्रसदस्वती श्रीचरणानां दर्शनभाग्यं कथमप्यलाभि। तेषां सविधे ग्रन्थोऽयमुपस्थापितः। वात्सल्यमहोदधिभिः श्रीमद्भिरवलोकितश्च। तदनुपदमेवास्य वैदिकस्तोत्रसाहित्यस्य प्रभूतधनसाध्यमुद्रणभारोऽङ्गीकृतः यतिवरेण्यैः विद्वद्विहगकल्पपादपैः। तदर्थे श्रीचरणानां केन वा विधानेन कृतज्ञतां प्रकटयेयम् इति न जाने बालिशमतिरहम्। अतः अस्य ग्रन्थस्य समर्पणं तेषां चरणयोर्भवतु इति निश्चित्य ग्रन्थः समर्पितः श्रीगुरुचरणयोः।

प्रार्थनां ममांगीकृत्यास्मद्गुरुभिः आस्थानविद्वान् श्रीगुणीगणपतिशास्त्रिभिः अस्य प्रस्तावना लिखिता। तथा च श्रीसर्वज्ञेंद्रसरस्वतीश्रीस्वामिनः श्रीदैवराता, श्री एन्. रंगनाथशर्मा, श्री रामचंद्रशास्त्री, श्री पं. विघ्नेश्वरशर्मा, श्री बालचंद्रशास्त्री प्रभृतये स्वाभिप्रायान् प्रकटितवंतः ग्रंथस्यास्यकृते तेऽप्यभिनंदनार्हाः॥

इत्यादिविज्ञापयिता

विद्वद्वशंवदः सांबदीक्षितः

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वि. पं. विघ्नेश्वरशर्मा,
गोकर्णः

आयुष्मद्भिः श्रीमद्भिः सांबदीक्षितैः बह्वर्थसाधकैः विशिष्टार्थ-प्रतिपादकैर्भगवतो वैश्वानरस्य नामसाहस्रैः संवलितं हृद्यं विरचितं स्तोत्रसाहित्यं मया व्यलोकि । अत्रत्य प्रतिनाम वेदाभिमानिभिः न केवलं पठनीयः, अपि तु मननीयं च, प्रपित्सूनां श्रेयसे कल्पेत, अन्यश्च गणपतेर्वेदपादस्तवः, इतरे श्लोकाः रसज्ञानां विपश्चितो कौतुक-मावहेत् इति विश्वसिमि । ग्रन्थस्यास्य सप्रणयपरिग्रहेण सहृदयाः कृतिकारस्य परिश्रामं सफलयेयुः इति विश्वसिमि ।

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

॥ अग्नि सहस्रनाम स्तोत्रम् ॥

प्रस्तावना

आस्थान विद्वान् गणपति शास्त्री गुणी नि. गो. सं. पा. अध्यक्षः अयि भो ! वेदबन्धवः, सुहृद्बान्धवाः !

अवधत्तैतद्यादिदमिदानीं समग्रमेकाग्रतया समवालोकि यदिदमग्निसहस्रनामस्तोत्रम् । संप्रापि च पारायणेनैकेनेव पुण्यपण्यं किमपीति ।

यदाहुः " नवेदाच्चापरं शास्त्रं न वेदाच्चापरो जपः, यतः ऐहिकामुष्मिक सुखेप्सुभिः अनुष्ठीयमानानां समेषां धर्माणां वेदमूलत्वं शास्त्रविदो वदन्ति, अतोहेतोः सर्वैरपितैर्वेदैक शरणैर्भवितव्यमिति निश्चप्रचम् । वेदमंत्रानेवानुष्ठाय यावान् कृती सुखी भवति न तावान्कृती भवति, वेदमंत्रार्थसूचक मंत्रांतरानुष्ठानेनेति सर्वानुभवेन प्रतीयते । शुद्धमूलिकौषध प्रयोगेण निर्गदइव अन्यगुणोपहितेन तेनैव मूलिकौषध प्रयोगेण तदभावदर्शनदृष्टान्तेन, तथा च भवरोगान्न निवृत्तो भवति कदाचिदिति महत्खेदास्पदम् । वेदैर्नाभ्यर्थित सुखं नकिञ्चिद्भूमौ पश्यामः तादृशसुखकरं च नैवजानीमो वयं । क्षणिकं नीरसंच सुखं प्रार्थ्य अनुभूय च तादृशमेव पुनः पुनः प्रार्थयामः, दुःखांतं च नैव गच्छामः । तत्त्वज्ञानाभावाच्चक्वचिद्विपरीतमपि फलमनुभवामः, अनुष्ठिताः श्रौतमंत्रास्तु अनुष्ठातृक्रमव्यति-

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

क्रमेपि स्वानर्थानेव संसाधयति उच्चारणैकप्रधानाः (शब्दमात्र-प्रधाना स्वतंत्रार्थसाधका इत्यपि वेदानुष्ठाने गूढं विजानीयुः। तथा च इतरानुष्ठानमिव वेदानुष्ठानं फले न व्यभिचरतीति सिद्धं भवति। अथ केन कारणेनेदं विहाय इतरानुष्ठान गर्ते पतित्वा विलुठन्तीति विमर्शने दोषश्चात्र महान्—दृश्यते, यत्स्वेष्टसाधकमंत्रसंग्रहाज्ञानम् साधकेषु सर्वेषु। तच्च दोषं उपाध्यायाख्येन सांबविश्चिता महता श्रमेण संग्रहीतोऽयं अग्निसहस्रनामाख्यो ग्रंथः परिहरतीतिनिः शंकं ब्रूमः। तत्र अनुष्ठातृफलभेदेन वेदराशिषु श्रृंगग्राहिकतया फलनिर्णय करणासंभवात् तत्फलनिर्देशकाग्निनामानुसन्धाने भृशमुपकारकः साधकतमो निवर्तकः सहस्रकिरणोदय इवायं सहस्रनामग्रन्थः समुदियायेति सत्यमुत्पश्यामः। अन्यथा "वाघता मुशिक्, 'दिव्ये न शोचिषाराजन्, 'तिस्रो देव्यो मयोभुवः, होतारा दैव्या[illegible]वी, तस्थिवान् परमे पदे," इत्यादीनां वाक्यरूपेण परिगृहीतानां नाम[illegible]त्वेन ग्रहणं दुर्घटमेव, नामत्वेन ज्ञाते एव अनुष्ठानसुकरं भवेत्, स्[illegible]वेष्ट-सिद्धिश्च स्यात्, यथा 'तिस्रोदेव्यो मयोभुवः, सुखजनक देवतात्र[illegible] स्वरूपाग्निज्ञानात् मनोवाक्कायकर्मजातपापनिरसन द्वारा आध्यात्मि-कादि दुःखत्रय नाशेन सत्वरजस्तमो गुणातीतपरमात्मज्ञान सौलभ्येन तन्नामपुरश्चरणेन सर्वं सुखं सम्पादयितुं शक्नोतिसाधक इति परम-महत्फलं संभवति। एवं अनन्यलभ्यानन्द सुखजनकमंत्रा नामरूपा अनेकेवर्तंते ऐहिकामुष्मिकफल संपादकाः 'मधुजिह्वः, रयिमान्, पृथुपाजा इत्यादयः। यद्यप्युपलभ्यंते एकपदान्येव नामानि तथापि

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तत्तत्फलविशेषैक्यमनसा अनुष्ठतृणां तादृशनाम्नामेव आवश्यकत्वात् तान्येव बहुलतया प्राय: समग्राहिषत 'तिस्रोदेव्यो मयोभुव:, तस्थिवान् परमे पदे, इत्यादीनिनाद्यावधि प्राकाशि। सुलभसाधन रूपोऽयं ग्रंथ इति हेतो: अस्य संग्राह्यत्वे न कश्चिद्विशेषतया वक्तव्योऽस्तीति परमादरणीयतामापद्यते इत्यनेनास्माकं महान्संतोष: । कृतकृत्यता च ग्रंथ प्रकाशकानांभवति । ननु वेदे परमध्येयत्वेन प्रकीर्तितस्य इन्द्रस्य नामसंग्रहस्यैव युक्तत्वात्कथ मग्ने र्नाम्नां संग्रह: ? इति चेन्न । अग्निर्देवोद्विजातीनामिति साक्षादनुष्ठान संबन्धो जातवेदस इव न परब्रह्मरूपस्येन्द्रस्येति अग्निसहस्रनाम्नामेव संग्रहस्य युक्तत्वात् । एवं च सारांशेन इदमुक्त्वा प्रस्तावाद्विरम्यते ॥ यत् ऐहिकामुष्मिक सुखेप्सव: सर्वेपि ग्रंथममुं संग्राह्य ज्ञानाधिगमद्वारा पारायण पुरश्चरणाद्यनुष्ठानेन स्वस्वेष्टफल भाजो भूयासुर्भूयांस इति वेदब्रह्माणं परमात्मानं सादरं प्रार्थयाम इति सर्वं शिवम् । ॐ तत्सत् ॥

श्रीमद्भि: सांबदीक्षितै: संग्रथितं अग्नि सहस्रनामस्तोत्रं सम्यगालोकि । पुरोहितानां परंपरयाग्निपरिचरणदक्षदीक्षित कुलजानां एतेषां एष परिश्रम: साधु । " अग्निर्देवो द्विजातीनां, इत्युक्तत्वात् सर्वेषां द्विजातीनां धर्मार्थकाममोक्षेप्सूनां नित्यपारायण ग्रन्थोयं भवतु। अनेन प्रीतो वेदपुरुष: इतोप्यधिकां सेवां एतै: प्रतिगृह्णातु। तेनास्तिकानां मोदं भवतु इत्याशास्महे ॥

श्रीमत्सर्वज्ञेंद्रसरस्वती श्री स्वामिन:

स्वर्णवल्ली मठ: (सोंदा)

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ई ॐ श्रीः

विदितमस्तु विदुषाम्—इदं अग्निसहस्रनामस्तोत्रम् नूतनतया समाविष्कृतमपि किञ्चिद्विचित्रं विशिष्टतरं च वैदिकत्वात् प्राचीनतरमिति च प्रतीयते ऋङ्मंत्रेभ्य एव अग्निदेवताया नाम्नां संग्रहेण संग्रथितत्वात्। अत्र कानिचिद्बहूनि नामानि प्रचलितेभ्यः संस्कृत शब्देभ्यः प्रसिद्धेभ्यः पौराणिकेभ्यो देवताभिधानेभ्यः विलक्षणानि विद्यन्ते। कानिचिद्विशिष्टसद्वस्तुतत्वगुणादि सल्लक्षणानीति प्रतिवेद्यन्ते॥

अद्ययावत्प्रसिद्धानि देवतार्चनादिषु प्रयुज्यन्ते विष्णु-शिव-गणेश-दुर्गा - ललितादिसहस्रनामस्तोत्राणि तानि सर्वाणि पुरातनान्यपि पौराणिकान्येवसन्ति पुराणेभ्य एव संगृहीतत्वात्तेषाम्॥

वेदे तु "भूर्भुवः स्वः इति व्याहृतित्रितय बोधित भुवनत्रयाधिष्ठितानां अग्नीन्द्रादित्यप्रमुखानां वैदिकदेवतानां यज्ञादि कर्मयोगेन तत्तत्कर्मपृथक्त्वेन पृथगभिधानस्तुतयो भवन्तीति प्रतीयन्ते। तत्रापि तत्वत्रययोगेन प्रत्यक्ष-परोक्ष अपरोक्षस्तुतयः प्राधान्येन प्रतिश्रूयन्ते। ऋग्वेदमंत्रेषु यज्ञादिसिद्धये यजन शंसनादि कर्मप्रयोगेषु प्रायः इन्द्राग्न्योः सोमस्य च ऋचः अधिकाः श्रूयन्ते। तासु च तेषामेव नामान्यप्यधिकान्यनुश्रूयन्ते। तत्रापि इन्द्रस्यैव सर्वथा प्राधान्यं दरीदृश्यते, तस्यैव सर्वदेवताधिपतित्वात् विश्वाध्यक्षत्वाच्च॥

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

"इदिपरमैश्वर्ये" इति धात्वर्थ तत्वयोगेन इंद्रस्यैव तत्पारमैश्वर्यं नित्यसिद्धं गम्यते ॥

यथा "बृहते र्धातोरर्थानुगमात्" ब्रह्मात्मनः सर्वज्ञत्वादेरस्तित्वप्रसिद्धिरभ्युपगम्यतेशारीरक ब्रह्ममीमांसायां ॥ "अस्तितावद्ब्रह्म नित्यशुद्धमुक्तस्वभावं सर्वज्ञं सर्व शक्तिसमन्वितं बृहतेर्धातोरर्थानुगमात् इति ॥

॥ वेदे तु इन्द्रस्यैव तद्ब्रह्मात्मत्वमिति उपनिषदां राद्धांत इति प्रतिज्ञायते । तथा च ऋङ्मंत्रवर्णः "इन्द्रो ब्रह्मेन्द्र ऋषिरिन्द्रः पुरू पुरुहूतः । महान्महीभिः शचीभिः" तदेव उपनिषत्प्रतिपादितं । ऋङ्मंत्रवर्णस्य परब्रह्मवस्तुतत्वार्थोपवर्णनमुखेन, इन्द्रस्यैव परब्रह्मात्मत्वसमर्थनेन ॥ तथा च—मधुविद्यायां तदुपदेशोपसंहारे तदुपश्रुतिः । इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच । "रूपं रूपं प्रतिरूपो बमूव तदस्य रूपं प्रति चक्षणाय । इन्द्रो मायाभिः पुरुरूपईयते युक्ताह्यस्य हरयः शतादश ॥ अयं वै हरयोऽयं वै दश च शतानि च बहूनिचानन्तानि च एतद्वै ब्रह्म पूर्वमनपरमनंतरमबाह्यम्, अयमात्माब्रह्म सर्वानुभूरित्यनुशासन । इति (बृ. उ.)

तथैव अक्षिपुरुष विद्यायां "इन्धे हवै नामैषः योऽयं दक्षिणेऽक्षन् पुरुषो दृश्यते तं वा एतमिन्धं सन्तमिन्द्र इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः, (बृ. उ.) एवमेव "प्रज्ञानं ब्रह्म" इति (ऐ. उ.) निर्देशो विशिष्टतरमनु श्रूयते "तदेतद्ब्रह्म

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ततमपश्यदिदमदर्शमितीॱतस्मादिदंद्रोह वै नाम तमिदंद्रं सन्तमिन्द्र इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः इति ।

तदिदं सर्वमपि वेदमंत्राणामुपनिषद्वचनानामपि रहस्यं सुविज्ञाय वासिष्ठेन गणपतिमुनिना प्रथमत ऋङ्मन्त्रेभ्य एव इन्द्रस्य सहस्रनाम्नां सङ्ग्रहेण तत्स्तोत्रं च प्रणीतम् ॥ प्रतिज्ञातञ्च भगवता ॥

" वैदिकस्तुति संबन्धात् यज्ञसंबंधतस्तथा ।
धात्वर्थस्य च वैशिष्ट्यादिन्द्रनाम विशिष्यते ॥ " इति ॥

अत एव प्रसिद्धतर ऋङ्मंत्रवर्णोद्घोषः प्रति श्रूयते " इन्द्र इति ब्रवीतन इति " " विश्वस्मादिन्द्र उत्तरः " " श्रदस्मै धत्त सजनास इन्द्र " " प्रसुस्तोमं भरत वाजयन्त इन्द्राय सत्यं यदि सत्यमस्ति " सत्यमिद्वा उतं वयं मिन्द्रं स्तवाम नानृतम् " इत्यादि, " रूपं रूपं प्रतिरूपो बभूव—युक्ताह्यस्य हरयः शतादश " इति वचनाद्यावन्ति रूपाणि तावन्ति नामानि यावन्ति नामानि तावन्ति रूपाणि इति इन्द्रात्मनस्तस्य सहस्रनामस्तोत्रस्य सार्थकता प्रतीयते,

सांप्रतम्—तत्रभवतां वासिष्ठगणपति मुनीनां तदेतन्मार्गदर्शनमेवानुसृत्य तदन्तेवासि वर्गपरम्परायां प्रतिष्ठितेन श्री सांबदीक्षितेन प्रणीतमिदं वैदिकं " अग्निसहस्रना मस्तोत्रम् तत्समानतत्वकमेवेति प्रतीयते ॥

अत्रेदं विशिष्टं तत्वम् । तदिदमैन्द्राग्नं द्विदैवत्यं प्रसिद्धम् । " ऐन्द्रः प्राणः, आग्नेयो वाच्यः आग्नेयी वाक्, " नागग्निः प्राण-

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

इन्द्रः ” इति तदनु श्रवणम् अतएव परमपुरुषस्य मुखात् वाक्सत्वकात् तदिदं द्विदैवत्यं संबभूवेत्यनु श्रूयते, ‘मुखादिन्द्रश्चाग्निश्च’ प्राणाद्वायुरजायत ॥ इति । तदेतेनात्र तदेतदुभयं तत्वं संगतं समनुस्यूतमिति प्रतिज्ञायते, अभ्यर्थ्यते च आचन्द्रार्कं अस्मिञ्जगतीतले विप्राणां वैदिकानां वदनारविन्दे तदेतत्शतसहस्रनामस्तोत्रयुगलम् अनवरतं विलसतादिति,

इत्यादि विज्ञापयिता भवदीयः
जनताहिताभिलाजी दैवरातः
ऋषिकुलयोगाश्रमः (गोकर्ण)

श्रीमद्भिः सांबदीक्षित उपाध्याय महोदयैः संग्रथितनग्निसहस्र नामस्तोत्रं मया सम्यगव लोकितम् । वेदेषु प्रस्तुतैरेव पवित्रैः शब्दैः कृतमिदं स्तोत्रं सर्वेषामपि वैदिकानां तत्रापि अग्निदैवतानां द्विजानां पारायणयोग्यमिति दृढो मे विश्वासः । श्रीमद्भिर्महता श्रमेण संग्रथितेयं नाममाला समेषां संमान्या भवेदितिनिश्वसिमि । अग्निमाहात्म्य प्रदर्शका इमे शब्दा सर्वे वैदिकाभवन्तीति कामपि सुषमां पुष्णातीदं स्तोत्ररत्नम् । श्रीमतां व्यवसाय इतोपि बहुमुखः सन् आस्तिकानां मोहमावहतु इत्याशासे ॥

पन्. रंगनाथ शर्मा
व्याकरण शास्त्र प्राध्यापकः
श्रीचामराजेन्द्र संस्कृतपाठशाला बेंगळूरु-

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

॥ श्रीगुरुः शरणम् ॥

श्रीमद्भिः सांबदीक्षित शर्मभिर्महतापरि श्रमेण निर्मिता भगवतोऽग्नेर्वेदांतर्गत संहस्रनामावलि स्तदीयाष्टोत्तर शतनामावली सहिता मंत्रसंख्या निर्देशपूर्वकं लिखिता मया दृष्टा। एकत्र संकलिता एषा अग्नेर्नामावलिरपि इतरनामावलिवत् जिज्ञासूनां कृते महते उपकाराय भवेदित्यत्रनास्ति संशीति लेशोपि। अष्टोत्तरशतनामावलिवत् अकारादिक्रमेणानुष्टुपू श्लोकानुसारेण वा यदि सहस्रनाम्नां विन्यासोऽत्र कृतः स्यात्तर्हि समीचीनास्यादिति भाति। एतेषां सर्वविधं मंगल भगवान् विश्वेश्वरोविदधात्वित्याशास्ते—

ह्योसमने इत्युपाह्वो गणेशसूनूरामचन्द्र शास्त्री,

सहायकोपाध्यक्षः सांगवेदविद्यालयस्य

मंत्री, गीर्वाणवाग्वर्धिनी सभायाः

रामघाट, वाराणसी. (उ. प्र.)

॥ श्री गुरुः शरणम् ॥

श्री कांचीकामकोटी मठपयतिवरं शकराचार्यरूप
सुज्ञानां सार्वभौमं सकलमतविदां पालकं द्वैतहीनम्।
काले कल्कि प्रभावान्निगमगिरि मधस्तात्पतन्तं वहन्तं
वंदे कूर्मस्वरूपं हरिमिव सततं चंद्रमौळि यतीन्द्रम् ॥ १ ॥

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रीमन्महादेव यतीश्वराणाम् कराब्जजातं सुयमीन्द्रमुख्यम् ।
सर्वज्ञकल्पं विधिविष्णुरूपम् श्री चन्द्रमौळीन्द्रयतिं नमामि ॥ २ ॥

श्री शंकराचार्यगुरुस्वरूपम् श्रीचन्द्रमौळीन्द्रकराब्जजातम् ।
श्रीकामकोटीन्द्रयतिं वरेण्यं श्रीमज्जयेन्द्रं शरणं प्रपद्ये ॥ ३ ॥

वेदाख्यवृक्षमनिशं परिपालयन्तं विद्वद्वरेण्यपततां भुवि कल्पवृक्षम् ।
नित्यं हसन्मुखमनोज्ञशशिस्वरूपं श्रीमज्जयेन्द्रमनिशं शरणं प्रपद्ये ॥ ४ ॥

जगद्गुरुभ्यां विबुधार्चिताभ्यां श्री चन्द्रमौळीन्द्र जयेन्द्रकाभ्याम् ।
श्रीकामकोटी श्वर शंकराभ्यां नमः सुविद्रक्षणदीक्षिताभ्याम् ॥ ५ ॥

इति श्रीगुरुचरणदासः हारीत,
सांबदीक्षित, गोकर्ण

श्री गणेशाय नमः

श्री सांबदीक्षित उपाध्यायः गोकर्ण
(वेदाचार्यः, व्याकरण विद्वान्)

॥ वाङ्मुखम् ॥

मातरं पितरं नत्वा लक्ष्मीं दामोदरं तथा ।
पूर्वैः सदेडितं चाग्निं गुरुं गणपतिं विभुम् ॥ १ ॥
अग्नेर्नामसहस्राणां संग्रहं वेदतो मया ।
उद्धृत्य क्रियते भक्त्या चित्रभानु प्रतुष्टये ॥ २ ॥
अत्र प्रमाणमृग्वेदे शुनः शेपो वसुश्च तौ ।
यदाहतुर्मंत्रवर्णैर्मर्ता अग्नेर्वयम् इति ॥ ३ ॥

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

काण्वो वसुः — मर्ता अमर्त्यस्य ते भूरिनाम मनामहे ।
विप्रासो जातवेदसः ॥ ८-११-६

आजीगर्तिः शुनः शेप :—
अग्नेर्वयं प्रथमस्यामृतानां मनामहे चारु देवस्य नाम ॥
सनो मह्या अदितये पुनर्दात् पितरं च दृशेयं मातरं च ॥
(ऋ १-२४-२)

अस्य नाम्नां सहस्रस्य ऋषिः श्री ब्रह्मणस्पतिः ।
सर्वमन्त्रप्रभुः साक्षा दग्निरेव हि देवता ॥ ४ ॥

अनुष्टुप् त्रिष्टुप् शक्वर्यश्छन्दांसि सुमहन्ति च ।
धर्मार्थकाममोक्षार्थं विनियोगो जपादिषु ॥ ५ ॥

ध्यानं चत्वारि शृंगेति वामदेवर्षिदर्शनम् ।
आग्नेयं दैवतं त्रिष्टुप् छन्दो जाप्ये हि युज्यते ॥ ६ ॥

ॐ चत्वारि शृंगात्रयो अस्य पादा
द्वे शीर्षे सप्तहस्तासो अस्य ।
त्रिधाबद्धो वृषभो रोरवीति
महो देवो मर्त्यां२ आविवेश ॥ ४-५७-३

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

॥ अग्नि सहस्रनाम स्तोत्रम् ॥

ॐ अग्निर्वसुपति र्होता दीदिवी रत्नधातमः ।
आध्रस्यचित्पिता जातः शीर्षतः सुक्रतुर्युवा ॥ १ ॥

भासाकेतुर्बृहत्केतुर्बृहदर्चाः कविक्रतुः ।
सत्यः सत्ययजो दूतो विश्ववेदा अपस्तमः ॥ २ ॥

स्वेदमे वर्धमानोर्हन्तनूक्रून्मृळयत्तमः ।
क्षेमो गुहाचरन्नाभिः पृथिव्याः सप्तमानुषः ॥ ३ ॥

अद्रेः सूनुर्नराशंसो बर्हिः स्वर्णर ईळितः ।
पावको रेरिहत्क्षामा घृतपृष्ठो वनस्पतिः ॥ ४ ॥

सुजिह्वो यज्ञनीरुक्षन् सत्यमन्मा सुमद्रथः ।
समुद्रः सुत्यजो मित्रो मियेध्यो नृमणार्यमा ॥ ५ ॥

पूर्व्यश्चित्ररथः स्पार्हः सुप्रथाः सहसो यहुः ।
यज्वा विमानो रजसा रक्षोहाथर्युरभ्रिगुः ॥ ६ ॥

सहन्त्यो यज्ञियो धूमकेतुर्वाजोऽगिरस्तमः ।
पुरुचंद्रो वपूरेवदनिमानो विचर्षणिः ॥ ७ ॥

द्विमाता मेधिरो देवानां शन्तमो वसुः ।
चोदिष्ठो वृषभश्चारुः पुरोगाः पुष्टिवर्धनः ॥ ८ ॥

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रामोधर्ता मन्द्रजिह्वः कल्याणो वसुवित्तमः ।
जामिः पूषा वावशानो व्रतपा अस्तृतोऽन्तरः ॥ ९ ॥

संमिश्लोंगिरसां ज्येष्ठो गवां त्राता महिव्रतः ।
विशां दूतस्तपुर्मूर्धा स्वध्वरो देववीतमः ॥ १० ॥

प्रत्नो धनस्पृदविता तपुर्जम्भो महागयः ।
अरुषोऽतिथिरद्मसद्वा जीदक्षपतिः सहः ॥ ११ ॥

तुविष्मान्छवसासूनुः स्वधावा ज्योतिरप्सुजाः ।
अध्वराणां रथी श्रेष्ठः स्वाहुतो वातचोदितः ॥ १२ ॥

धर्णसिर्भोजनस्त्राता मधुजिह्वोमनुर्हितः ।
नमस्य ऋग्मियो जीरः प्रचेताः प्रभुरश्रितः ॥ १३ ॥

रोहिदश्वः सुप्रणीतिः स्वराड्गृत्सः सुदीदितिः ।
दक्षो विवस्वतो दूतो वृहद्भा रयिवान् रयिः ॥ १४ ॥

अध्वराणां पतिः सम्राड्घृष्विर्दास्त्रान्विशां प्रियः ।
घृतस्नुरदितिः स्वर्वाञ्छ्रुत्कर्णो नृतमो यमः ॥ १५ ॥

अंगिराः सहसः सूनुर्वसूनामरतिः क्रतुः ।
सप्तहोता केवलोऽप्यो विभावा मघवा धुनिः ॥ १६ ॥

समिधानः प्रतरणः पृक्षस्तमसि तस्थिवान् ।
वैश्वानरो दिवोमूर्धा रोदस्योररतिः प्रियः ॥ १७ ॥

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यज्ञानां नाभि रत्रिः सन्तिस्संधूनां जामिराहुतः ।
मातरिश्वा वसुधिति र्वेधाऊर्ध्वस्तवोहितः ॥ १८ ॥

अश्वीभूर्णिरिनो वामो जनीनां पतिरन्तमः ।
पायुर्मर्तेषु मित्रोऽर्यः श्रुष्टिः साधुरहि ऋभुः ॥ १९ ॥

भद्रोऽजुर्यो हव्यदातिश्चिकित्वान्विश्वशुक् पृणन् ।
शंसः संज्ञातरूपोऽपांगर्भस्तुविश्रवस्तमः ॥ २० ॥

गृघ्नुः शूरः सुचन्द्रोश्वोऽदब्धो वेधस्तमः शिशुः ।
वाजश्रवा हर्यमाण ईशानो विश्वचर्षणिः ॥ २१ ॥

पुरुप्रशस्तो वाघ्रचश्वोऽनवर्चाः कनिक्रदत् ।
हरिकेशो रथी मर्यः स्वश्वो राजन्तुविष्वणिः ॥ २२ ॥

तिग्मजम्भः सहस्राक्षस्तिग्मशोचिर्द्रुहन्तरः ।
ककुदुक्थ्यो विशां गोपा मंहिष्ठो भारतो मृगः ॥ २३ ॥

शातात्मोरुज्रयावीरश्चेकितानो धृतव्रतः ।
तनूरुक् चेतनोऽपूर्व्यो व्यध्वा चक्रिर्धियावसुः ॥ २४ ॥

श्रितः सिन्धुषु विश्वेष्वनेहा ज्येष्ठ श्वनोहितः ।
अदाभ्यश्चोद ऋतुपा अमृक्तः शवसस्पतिः ॥ २५ ॥

गुहासद्वीरुधां गर्भः सुमेधाः शुष्मिणस्पतिः ।
सुप्रदानुः कवितमः श्वितानो यज्ञसाधनः ॥ २६ ॥

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तुविद्युम्नोऽरुषस्तूपो विश्वविद्गातुवित्तमः ।
श्रुष्टीवाञ्छ्रेणिदन् दाता पृथुपाजाः सहस्कृतः ॥ २७ ॥

अभिश्रीः सत्यवाक् त्वेषो मात्रोः पुत्रो महिन्तमः ।
घृतयोनिर्दिदृक्षेयो विश्वदेव्यो हिरण्ययः ॥ २८ ॥

अनुषत्यः कृष्णजंहाः शतनीथोऽप्रतिष्कुतः ।
इळायास्पुत्र ईळेन्यो विचेता वाघतामुशिक् ॥ २९ ॥

वीतोर्को मानुषोऽजस्रो विप्रः श्रोतोर्विया वृषः ।
हिरण्यकेश आवाधो वीळुजम्भो हरिव्रतः ॥ ३० ॥

दिवः केतुर्भुवोमूर्धा सरण्यन्दुर्दमः सुरुक् ।
दिव्येन शोचिषा राजन् सुदीतिरिषिरो बृहत् ॥ ३१ ॥

सुदृशीको विशां केतुः पुरुहूत उपस्थसद् ।
पुरोयावा पुर्वणीकोऽनिवृतः सत्पति र्द्युमान् ॥ ३२ ॥

यज्ञस्य विद्वानव्यथ्यो दुर्वर्तुर्भूर्जयन्नपात् ।
अमृतः सौभगस्येशः स्वराज्यो देवहूतमः ॥ ३३ ॥

कीलालपा वीतिहोत्रो घृतनिर्णिक् सनश्रुतः ।
शुचिवर्णस्तुविग्रीवो भारती शोचिषस्पतिः ॥ ३४ ॥

सोमपृष्ठो हिरिश्मश्रु र्भद्रशोचिर्जुगुर्वणिः ।
ऋत्विक् पूर्वेभि ऋषिभिरीड्य श्चित्रश्रवस्तमः ॥ ३५ ॥

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भीमस्तियानां वृषभो नूतनैरीड्य आसुरः ।
स्तभूयमानोऽध्वराणां गोपा विश्पतिरस्मयुः ॥ ३६ ॥

ऋतस्यगोपा जीराश्वो जोहूत्रो दम्पतिः कविः ।
ऋतजातोद्युक्षवचा जुह्वास्योऽमीवचातनः ॥ ३७ ॥

सोमगोपाः शुक्रशोचिर्घृताहवन आयजिः ।
असन्दितः सत्यधर्मा शशमानः शुशुक्वनिः ॥ ३८ ॥

वातजूतो विश्वरूपस्त्वष्टा चारुतमो महान् ।
इळा सरस्वती हुर्षन्तिस्रो देव्यो मयो भुवः ॥ ३९ ॥

अर्वा सुपेशसौ देव्यौ होतारौ स्वर्पतिः सुभाः ।
देवीर्द्वारो जराबोधो हूयमानो विभावसुः ॥ ४० ॥

सहसावान्ममृजेन्यो हिंस्रोऽमृतस्यरक्षिता ।
द्रविणोदा भ्राजमानो धृष्णुरूर्जांपतिः पिता ॥ ४१ ॥

सदा यविष्ठो वरुणो वरेण्यो भाजयुः पृथुः ।
वन्द्योऽध्वराणां सम्राजन्सुशेवो धीर्ऋषिः शिवः ॥ ४२ ॥

पृथुप्रगामा विश्वायु र्मीढ्वान्यन्ताशुचत्सखा ।
अनवद्यः पप्रथानस्तनमानो विभुः शयुः ॥ ४३ ॥

श्वैत्रेयः प्रथमो द्युक्षो बृहदुक्षा सुकृत्तरः ।
वयस्कृदग्नित्तोकस्य त्राता प्रीतो विदुष्टरः ॥ ४४ ॥

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तिग्मानीको होत्रवाहो विगाहः स्वतवान्भृमिः ।
जुजुषाणः सप्तरश्मि र्ऋषिकृत्तुर्वणिः शुचिः ॥ ४५ ॥

भूरिजन्मा समनगाः प्रश स्तो विश्वतस्पृथुः ।
वाजस्य राजाश्रुत्यस्य राजा विश्वभरा वृषा ॥ ४६ ॥

सत्यताति र्जातवेदास्त्वाष्ट्रोऽमर्त्यो वसुश्रवाः ।
सत्यशुष्मो भाऋजीकोऽध्वरश्रीः सप्रथस्तमः ॥ ४७ ॥

पुरुरूपो बृहद्भानुर्विश्वदेवो मरुत्सखः ।
रुशदूर्मि र्जेहमानो भृगवान् वृत्रहाक्षयः ॥ ४८ ॥

वामस्यरातिः कृष्टीनां राजा रुद्रः शचीवसुः ।
दक्षैः सुदक्ष इन्धानो विश्वकृष्टिर्बृहस्पतिः ॥ ४९ ॥

अपां सधस्थो वसुविद्रण्वो भुज्म विशां पतिः ।
सहस्रवल्शो धरुणो वह्निः शम्भुः सहन्तमः ॥ ५० ॥

अच्छिद्रोतिश्चित्तशोचिर्हृषीवानतिथिर्विशाम् ।
दुर्धरीतुः सपर्येण्यो वेदिषच्चित्र आतनिः ॥ ५१ ॥

दैव्यः केतुस्तिग्महेतिः कनीनां जार आनवः ।
ऊर्जाहुति र्ऋतश्चेत्यः प्रजानन्सर्पिरासुतिः ॥ ५२ ॥

गुहाचतश्चित्रमहा द्रुन्नः सूरो नितोशनः ।
क्रत्वाचेतिष्ठ ऋतचित्त्रिवरूथः सहस्रजित् ॥ ५३ ॥

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

संदृग्जूर्णिः क्षोद आयुरुषर्बुद्राजसातमः ।
नित्यः सूनुर्जन्य ऋतप्रजातो वृत्रहन्तमः ॥ ५४ ॥

वर्षिष्ठः स्पृहयद्वर्णो घृणिर्जातो यशस्तमः ।
वनेषु जायुः पुत्रसन्पिता शुक्रो दुरोणयुः ॥ ५५ ॥

आशुहेमः क्षयद्घोरो देवानां केतुरह्रयः ।
दुरोकशोचिः पल्ति सुवर्चा वहुलोऽद्भुतः ॥ ५६ ॥

राजारयीणां निषत्तो धूर्षद्रुक्षो ध्रुवो हरिः ।
धर्मो द्विजन्मा सुतुकः शुशुक्वान् जार उक्षितः ॥ ५७ ॥

नाद्यः सिप्णुर्दधिः सिंह ऊर्ध्वशोचिरनानतः ।
शेवः पितूनां स्वाध्याहावोऽप्सु सिंहइवश्रितः ॥ ५८ ॥

गर्भोवनानां चरथां गर्भोयज्ञः पुरूवसुः ।
क्षपावान्नृपतिर्मेध्यो विश्वः श्वेतः परीवृतः ॥ ५९ ॥

स्थातां गर्भः शुक्रवर्चास्तस्थिवान्परमेपदे ।
विद्वान्मर्ताश्च देवानां जन्म श्येतः शुचिव्रतः ॥ ६० ॥

ऋतप्रवीतः सुब्रह्मा सविता चित्तिरप्सुषद् ।
चन्द्रः पुरस्तूर्णितमः स्पन्द्रो देवेषु जागृविः ॥ ६१ ॥

पुरएता सत्यतर ऋतावा देववाहनः ।
अतन्द्र इन्द्रः क्रतुविच्छोचिष्ठः शुचिदच्छितः ॥ ६२ ॥

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

हिरण्यकेशः सुप्रीतो वसूनां जनिताऽसुरः ।
ऋम्वासुशर्मा देवावी र्दधद्रत्नानि दाशुषे ॥ ६३ ॥

पूर्वो दधृग्दिवस्पायुः पोता धीरः सहस्रसाः ।
सुमृळीको देवकामो नवजातो धनञ्जयः ॥ ६४ ॥

शश्वत्तमो नीलपृष्ठ ऋष्वो मन्द्रतमोऽग्रियः ।
स्वर्चिरंशो दारुरस्त्रिच्छितिपृष्ठो नमो वहन् ॥ ६५ ॥

पन्यांस्तरुणः सम्राट् चर्षणीनां विचक्षणः ।
स्त्वंगः सुवीरः कृष्णाध्वा सुप्रतूर्तिरिळो महि ॥ ६६ ॥

यविष्ठयो दक्षुषवृको वाशीमानवनो घृतम् ।
ईवानस्ता विश्ववार श्चित्रभानुरपां नपात् ॥ ६७ ॥

नृचक्षा ऊर्जयञ्छीरः सहोजा अद्भुतक्रतुः ।
बह्वनामवमो भिद्युर्भानुर्मित्रमहो भगः ॥ ६८ ॥

वृश्चद्वनो रोरुचानः पृथिव्याः पतिराधृषः ।
दिवः सूनुर्दस्मवर्चा यन्तुरो दुष्टरो जयन् ॥ ६९ ॥

स्वर्विद्रण श्रीरथिरो नाकः शुभ्रोप्तुरः ससः ।
हिरिशिप्रो विश्वमिन्वो भृगूणां रातिरद्वयन् ॥ ७० ॥

सुहोता सुरणः सुद्यौर्मेधातास्त्रवसः पुमान् ।
अश्वदावा श्रेष्ठशोचिर्यजीयान्हर्यतोऽर्णवः ॥ ७१ ॥

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सुप्रतीकश्चित्रयामः स्वभिष्टिश्चक्षणीरुशन् ।
बृहत्सूरः पृष्ठबन्धुः शचीवान्संयतः चिकित् ॥ ७२ ॥

विशामीड्यो हिंस्यमानो वयोधा गिर्वणास्तपुः ।
वशान्न उग्रोऽद्वयावी त्रिधातुस्तरणिः स्वयुः ॥ ७३ ॥

त्रययाय्यश्चर्षणीनां होता वीळुः प्रजापतिः ।
गुहमानो निर्मथितः सुदानुरिषितो यजन् ॥ ७४ ॥

मेधाकारो विप्रवीरः क्षितीनां वृषभोऽरतिः ।
वाजिन्तमः कण्वतमो जरिता मित्रियोऽजरः ॥ ७५ ॥

रायस्पतिः कूचिदर्थी कृष्णयामो दिविक्षयः ।
घृतप्रतीक श्चेतिष्ठः पुरुक्षुः सत्वनोऽक्षितः ॥ ७६ ॥

नित्यहोता पूतदक्षः ककुद्मान् क्रव्यवाहनः ।
दिधिषाय्यो दिद्युतानः सुद्योत्मा दस्युहन्तमः ॥ ७७ ॥

पुरुवारः पुरुतमो जर्हृषाणः पुरोहितः ।
शुचिजिह्वो जर्भुराणो रेजमानस्तनूनपात् ॥ ७८ ॥

आदितेयो देवतमो दीर्घतन्तुः पुरन्दरः ।
दिवियोनिर्दर्शत श्रीर्जरमाणः पुरुप्रियः ॥ ७९ ॥

ज्रयसानः पुरुप्रैषो विश्वतूर्तिः पितुष्पिता ।
सहसानः सञ्चिकित्वान्दैवोदासः सहोवृधः ॥ ८० ॥

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शोचिष्केशो धृषद्वर्णः सुजातः पुरुचेतनः ।
विश्वश्रुष्टिर्विश्ववार्य आयजिष्ठः सदानवः ॥ ८१ ॥

नेताक्षितीनां दैवीनां विश्वादः पुरुशोभनः ।
यज्ञवन्युर्वह्नितमो रंसुजिह्वो गुहाहितः ॥ ८२ ॥

त्रिषधस्थो विश्वधायो होत्राविद्विश्वदर्शतः ।
चित्रराधाः सूनृतावान् सद्योजातः परिष्कृतः ॥ ८३ ॥

चित्रक्षत्रो वृद्धशोचिर्विनिष्ठो ब्रह्मणस्पतिः ।
वव्रिः परस्पा उषसामिधानः सासहिः सदृक् ॥ ८४ ॥

वाजी प्रशंस्यो मधुपृक् चिकित्रो नक्ष्यः सुदृक्षोऽदृपितो वसिष्ठः ।
दिव्यो जुषाणो रघुयत् प्रयज्युः दुर्यः सुराधाः प्रयतोऽप्रमृष्यः ॥८५॥

वातोपधूतो महिना दृशेन्यः श्रीणामुदारो धरुणो रयीणां ।
दीर्घद्रुरुक्मान्द्रविणस्युरत्यः श्रियं वसानः प्रवपन्यजिष्ठः ॥ ८६ ॥

वस्यो विदानो दिविजाः पनिष्ठो दम्यः परिज्मा सुहवो विरूपः ।
नाभिर्जनानां विषितो वपुष्यः शुक्रेभिरंगैरज आततन्वान् ॥ ८७ ॥

अध्रुग्वरूथ्यः सुदृशीकरूपो ब्रह्मा विविद्वान् चिकितु विभानुः ।
घर्णि विधर्ता विविचिः स्वनीको यह्वः प्रकेतो वृषणश्वकानः ॥ ८८॥

जुष्टो मनोता प्रमति विहायाः जेन्यो हविष्कृत् पितुमान्छविष्ठः ।
मतिः सुपित्र्यः सहसी दृशानः शुचि प्रतीको विषुणो मितद्रुः ॥८९॥

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दविद्युतद्राजपतिर्विजावा विश्वस्य नाभिः सनृजः सुवृक्तिः ।
तिग्मः सुदंसा हरितस्तमोहा जेता जनानां ततुरिर्विनर्गुः ॥ ९० ॥

प्रेष्ठो धनर्चः सुषखोधियन्धिः मन्युः पयस्वान्महिषः समानः ।
सूर्यो घृणीवान् रथयुर्घृतश्रीः श्रोता शिमीवान्भुवनस्प गर्भः ॥ ९१ ॥

सहस्ररेता नृषदप्रयुच्छन् वेनो वपावान्सुषुमञ्छिशानः ।
मधुप्रतीकः स्वयशाः सहीयान् नव्यो मुहुर्गीः सुभगो रभस्वान् ॥९२

यज्ञस्य केतुः सुमनस्यमानो देवः श्रवस्यो वयुनानि विद्वान् ।
दिवस्पृथिव्योररति हविर्वाट् विष्णू रथः सुष्टुत ऋञ्जसानः ॥ ९३ ॥

विश्वस्य केतु श्च्यवनः सहस्यो हिरण्यरूपः प्रमहा सुजंभः ।
रुशद्वसानः कृपनीळ ऋंधन् कृत्व्यो घृतान्नः पुरुधप्रतीकः ॥ ९४ ॥

सहस्रमुष्कः सुशमी त्रिमूर्धा मन्द्रः सहस्वानिषयन्तरुत्रः ।
तृषुच्युत श्चन्द्ररथो भुरण्युर्धासिः सुवेदः समिधा समिद्धः ॥ ९५ ॥

हिरण्यवर्णः शमिता सुदत्रो यज्ञस्य नेता सुधितः सुशोकः ।
कविप्रशस्तः प्रथमोऽमृतानाम् सहस्रशृंगो रयिविद्रयीणाम् ॥ ९६ ॥

ब्रध्नो हृदिस्पृक् प्रदिवो दिविस्पृग्विभ्वा सुबन्धुः सुयजो जरद्विट् ।
अपाकचक्षा पधुहस्त्य इद्धो धर्मस्त्रिपस्त्यो द्रविणाः प्रतिव्यः ॥ ९७ ॥

पुरुष्टुतः कृष्णपविः सुशिप्रः पिशंगरूपः पुरुनिष्ठ एकः ।
हिरण्यदन्तः सुमखः सुहव्यो दस्मस्तपिष्ठः सुसमिद्ध इर्यः ॥ ९८ ॥

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सुद्युत् सुयज्ञः सुमनाः सुरत्न सुश्रीः सुसंसत् सुरथः सुसन्दृक् ।
तन्वासुजातो वसुभिः सुजातः सुदृक् सुदेवः सुभरः सुबर्हिः ॥ ९९ ॥

ऊर्जोनपाद्रयिपतिः सुविदत्र आपि रक्तोजिरो गृहपतिः पुरुवारपुष्टिः ।
विद्युद्रथः सुसनिता चतुरक्ष इष्टि र्दीधान इन्दुरुरुक्रुद् घृतकेश आशुः ॥

॥ इत्यग्निसहस्रनाम स्तोत्रम् ॥

॥ अन्तिमा वाक् ॥

नाम्नां सहस्रजापेन प्रीतः श्री हव्यवाहनः ।
चतुर्णां पुरुषार्थानां दाताभवतु मे प्रभुः ॥ १ ॥

नात्रनाम्नां पौनरुक्त्यं न चकारादि पूरणम् ।
श्लोकानां शतकेनैव सहस्रं ग्रथितं मया ॥ २ ॥

श्लोका श्चतुरशीतिस्युरादितस्ता अनुष्टुभः ।
ततः पञ्चदशत्रिष्टुविन्द्रवज्रोपजातिभिः ॥ ३ ॥

एकान्त्या शक्वरी साहि वसन्ततिलका मता ।
सार्धैकादशकैः श्लोकै र्नाम्नामष्टोत्तरं शतम् ॥ ४ ॥

संगृहीतानि वेदाब्धेरग्नेरेव महीयसः ।
ओंकारमादौ नामानि चतुर्थ्यंतानि तत्वतः ॥ ५ ॥

नमोन्तानि प्रयोज्यानि विनियोगे मनीषिभिः ।
वैदिकत्वाच्च सर्वेषां नाम्नामन्ते प्रदर्शितम् ॥ ६ ॥

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सौकर्याय हि सर्वेषां चतुर्थ्यंतं मुदे मया ।
नाम्नां विशेषज्ञानार्थं मन्त्रांकश्च प्रदर्शितः ॥

इति श्री गोकर्णाभिजनस्य दीक्षितदामोदरसूनोः,
सांबदीक्षितस्य कृतौ अग्निसहस्रनाम स्तोत्रम्
॥ संपूर्णणम् ॥

॥ श्री गणेशाय नमः ॥

॥ अथाग्नेरष्टोत्तर शतनामस्तोत्रम् ॥

ॐ अजोऽजरोऽजिरोऽजुर्योऽ तंद्रोऽग्निरंदूभुतक्रतुः ।
अंकूयन्नंगिरा अर्वन्नज्ञानः सप्तहोतृभिः ॥ १ ॥

आशृण्वन्नाशुहेमोऽप्य आसन्नासुर आहुतः ।
आदित्य आपिराबाध आकूतिराघृणीवसुः ॥ २ ॥

इधान इद्ध इन्धानो दधत्सहस्त्रिणीरिषः ।
ईड्य ईळेन्यईशान इषयन्निळ ईळितः ॥ ३ ॥

उक्थ्य उसन्नुक्षमाण उक्षान्नो दिवमुत्पतन् ।
उर्जः पुत्र ऊर्जसन ऊर्ध्व ऊर्जोनपादुशन् ॥ ४ ॥

ऋजूयमानः पृथिवीमुतद्यामुत ऋत्वियः ।
ऋत मवीत ऋतचिद्दतावानृन्ध ऋग्मियः ॥ ५ ॥

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ऋभूणां पुत्र ऋषिकृद्दतावृद्दतुपा ऋभुः ।
ऋषीणां पुत्र ऋषभ ऋभ्व ऋतुपति ऋषिः ॥ ६ ॥

ओषधीनां गर्भ एक ओजिष्ठ श्चर्षणीसदाम् ।
ककुत् ककुद्मान् क्रतुवित् कृष्णयामः कनिक्रदत् ॥ ७ ॥

कण्वतमः कण्वसखः केवलः कृष्णवर्तनिः ।
कपिः कविः कवितमः कविशस्तः कविक्रतुः ॥ ८ ॥

कवि प्रशस्तः कृष्णाध्वा क्रव्यादः क्रव्यवाहनः ।
क्षत्राणि धारयन् क्षत्रः क्षपावान् क्षत्रभृत् क्षयः ॥ ९ ॥

गणश्रीश्चरथां गर्भोऽपां गर्भो गातुवित्तमः ।
बह्वीनामपसांगर्भस्थातां गर्भो गुहाहितः ॥ १० ॥

गृत्सो गृहपति गृध्नुर्गोपाघोर श्चनोहितः ।
जातवेदास्तपुर्मूर्धा दीर्घतन्तु धृतव्रतः ॥ ११ ॥

बृहद्भानुर्मधुवचा यज्ञो रण्वो वनस्पतिः ।
देवानामवमस्याग्ने र्नाम्नामष्टोत्तरं शतम् ॥ १२ ॥

॥ इत्यग्न्यष्टोत्तर शतनाम स्तोत्रम् संपूर्णम् ॥

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

॥ श्री गणेशाय नमः ॥

॥ अथ अग्निसहस्रनामावळिः ॥

१	ॐ अग्नये	नमः	१-१-१
२	,, वसुपतये	,,	२-१-११
३	,, होत्रे	,,	१-१-१
४	,, दीदिवये	,,	१-१-४
५	,, रत्नधातमाय	,,	१-१-१
६	,, आध्रस्यचित्पित्रे	,,	१-३१-१४
७	,, शीर्षतो जाताय	,,	१०-८८-१६
८	,, सुक्रतवे	,,	१-१२-८४
९	,, यूने	,,	१-१२-६
१०	,, भासाकेतवे	,,	१०-२०-३
११	,, बृहत्केतवे	,,	५-८-२
१२	,, बृहदर्चसे	,,	५-२५-७
१३	ॐ कविक्रतवे	नमः	१-१-२
१४	,, सत्याय	,,	१-१-५
१५	,, सत्ययजाय	,,	६-१६-४५
१६	,, दूताय	,,	१-२१-१
१७	,, विश्ववेदसे	,,	१-१२-१
१८	,, अपस्तमाय	,,	१०-११५-२
१९	,, स्वेदसे वर्धमानाय	,,	१-१-९
२०	,, अर्हते	,,	१-१४-१
२१	,, तनूकृते	,,	१-३१-१
२२	,, मृळयत्तमाय	,,	१-९४-१४
२३	,, क्षेमाय	,,	१० २०-६
२४	,, गुहाचरते	,,	३-१-९

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

२५	ॐ	पृथिव्यानाभये	नमः	१-५९-२
२६	,,	सप्त ानुषाय	,,	८-३९-८
२७	,,	अद्रेः सूनवे	,,	१०-२० ७
२८	,,	नराशंसाय	,,	१-१३-३
२९	,,	वर्हये	,,	१-१३-५
३०	,,	स्वर्णराय	,,	६-१५-४
३१	,,	ईळिताय	,,	१-१३९.७
३२	,,	पावकाय	,,	१-२२-१०
३३	,,	क्षामारेरिहते	,,	१०-४५-४
३४	,,	घृतपृष्ठाय	,,	५-४-३
३५	,,	वनस्पतये	,,	१-१३-११
३६	,,	सुजिह्वाय	,,	१-१०-४
३७	,,	यज्ञन्ये	,,	१-१५-१२
३८	,,	उक्षते	,,	१-१२२-४
३९	ॐ	सत्यमन्मने	नमः	१-७३-२
४०	,,	सुभद्रथाम	,,	८-५६-५
४१	,,	समुद्राय	,,	४-७८-१
४२	,,	सुत्यजाय	,,	८ ६०-१६
४३	,,	मित्राय	,,	३ ५-३
४४	,,	मियेध्याय	,,	१ २८-१
४५	,,	नृमणे	,,	१०-४५-१
४६	,,	अर्यम्णे	,,	५ ३-२
४७	,,	पूर्व्याय	,,	१-२६-५
४८	,,	चित्ररथाय	,,	१०.१-५
४९	,,	स्पार्हाय	,,	४-१-१२
५०	,,	सुप्रयसे	,,	२-२.१
५१	,,	सहस्रोयह्वे	,,	१-२६-१०
५२	,,	यज्वने	,,	३-१४-१

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

५३	ॐ	रजसाविमानाय	नमः	३-२६-७
५४	,,	रक्षोघ्ने	,,	४-४-१
५५	,,	अथर्यवे	,,	७-१-१
५६	,,	अघ्निगवे	,,	३-२१-४
५७	,,	सहन्त्याय	,,	१-२७-८
५८	,,	यज्ञियाय	,,	३ १-२१
५९	,,	धूमकेतवे	,,	१-२७-११
६०	,,	वाजाय	,,	२-१-१२
६१	,,	अंगिरस्तमाय	,,	१-३१-२
६२	,,	पुरुचन्द्राय	,,	१-२७-११
६३	,,	वपुषे	,,	१-१४१-२
६४	,,	रेवते	,,	३-२३-२
६५	,,	अनिमानाय	,,	१-२७-११
६६	,,	विचर्षणये	,,	१-३१-६
६७	ॐ	द्विमात्रे	नमः	१-३१-२
६८	,,	मेधिराय	,,	१-३१-२
६९	,,	देवानां देवाय	,,	१-३१-१
७०	,,	शन्तमाय	,,	१-१२८-७
७१	,,	वसवे	,,	१-३१-३
७२	,,	चोदिष्ठाय	,,	८-१०२-३
७३	,,	वृषभाय	,,	१-३१-५
७४	,,	चारत्रे	,,	१-९४-१३
७५	,,	पुरोगे	,,	१०-१२४ ९
७६	,,	पुष्टिवर्धनाय	,,	१-३१-५
७७	,,	रायो धर्त्रे	,,	५-१५-१
७८	,,	मन्द्रजिह्वाय	,,	४-११-५
७९	,,	कल्याणाय	,,	१-३१-९
८०	,,	वसुवित्तमाय	,,	१-४५-७

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

८१	ॐ	जामये	नमः	१-१५-४
८२	,,	पूष्णे	,,	२-१-६
८३	,,	वावशानाय	,,	१०-५-५
८४	,,	व्रतपे	,,	१-३१-१०
८५	,,	अस्तृताय	,,	६-१६-२०
८६	,,	अन्नराय	,,	१०-५३-१
८७	,,	सम्मिश्लाय	,,	१०-६-४
८८	,,	अंगिरसां ज्येष्ठाय	,,	१-१२७-२
८९	,,	गवां त्राते	,,	१-३९-१२
९०	,,	महिव्रताय	,,	१-४५-३
९१	,,	विशांदूताय	,,	१-३६-५
९२	,,	तपुर्मूर्ध्ने	,,	७-३-१
९३	,,	स्वध्वराय	,,	१-१२७-१
९४	,,	देववीतमाय	,,	१-३६-९

९५	ॐ	प्रत्नाय	नमः	३-९-८
९६	,,	धनस्पृते	,,	१-३६-१०
९७	,,	अवित्रे	,,	३-१९-५
९८	,,	तपुर्जंभाय	,,	१-५८-५
९९	,,	महागयाय	,,	१-६६-२०
१००	,,	अरुषाय	,,	३-७-६
१०१	,,	अतिथये	,,	१-४४-४
१०२	,,	अस्यद्मसद्वने	,,	६-४-४
१०३	,,	दक्षपतये	,,	१-१५-६
१०४	,,	सहसे	,,	१-३६-१८
१०५	,,	तुविष्मते	,,	४-५-३
१०६	,,	शवसः सूनवे	,,	१-२७-२
१०७	,,	स्वधात्रे	,,	१-१४४-७
१०८	,,	ज्योतिषे	,,	४-१०-३

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

१०९	ॐ अप्सुजे	नमः	८-४३-२८
११०	,, अध्वराणां रथ्ये	,,	१-४४-२
१११	,, श्रेष्ठाय	,,	१-४४-४
११२	,, स्वाहुताय	,,	१-४४-४
११३	,, वातचोदिताय	,,	१-५८-५
११४	,, घर्णसये	,,	५-८-४
११५	,, भोजनाय	,,	१-४४-५
११६	,, त्रात्रे	,,	१-४४-५
११७	,, मधुजिह्वाय	,,	१-४४-६
११८	,, मनुर्हिताय	,,	८-१९-२१
११९	,, नमस्याय	,,	१-७२-५
१२०	,, ऋग्मियाय	,,	८-२३-३
१२१	,, जीराय	,,	१-४४-४
१२२	,, प्रचेतसे	,,	१-४४-११
१२३	ॐ प्रभवे	नमः	८-४३-२१
१२४	,, अश्रिताय	,,	४-७-६
१२५	,, रोहिदश्वाय	,,	४-१-८
१२६	,, सुप्रणीतये	,,	१-७३-९
१२७	,, स्वराजे	,,	१-३६-७
१२८	,, गृत्साय	,,	३-१-२
१२९	,, सुदीदितये	,,	३-९-१
१३०	,, दक्षाय	,,	३-१४-७
१३१	,, विवस्वतो दूताय	,,	४-७-४
१३२	,, बृहद्भाससे	,,	१-४५-८
१३३	,, रयिवते	,,	६-५-७
१३४	,, रयये	,,	२-१-१२
१३५	,, अध्वराणां पत्ये	,,	१-४४-९
१३६	,, सम्राजे	,,	८-१९-३२

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

१३७	ॐ घृष्वये	नमः	४-२-१३
१३८	,, दास्वते	,,	१-१२७-१
१३९	,, विशां प्रियाय	,,	७-१-९
१४०	,, घृतस्नवे	,,	७-२६-२
१४१	,, अदितये	,,	१-९४-१५
१४२	,, स्वर्वते	,,	१-५९-४
१४३	,, श्रुत्कर्णाय	,,	१-४४-१३
१४४	,, नृतमाय	,,	१-७७-४
१४५	,, यमाय	,,	१-६६-८
१४६	,, अंगिरसे	,,	१-३१-१७
१४७	,, सहसः सूनवे	,,	१-५८-८
१४८	,, वसूनामरतये	,,	१०-५८-१
१४९	,, क्रतवे	,,	१-६७-२
१५०	,, सप्तहोत्रे	,,	३-२९-१४
१५१	ॐ केवलाय	नमः	१-९३-१०
१५२	,, अभ्यास	,,	१-१४५-५
१५३	,, विभाग्ने	,,	१-५८-९
१५४	,, मघोने	,,	१-५८-९
१५५	,, धुनये	,,	१-७९-१
१५६	,, समिधानाय	,,	१-१४३-२
१५७	,, प्रतरणाय	,,	२-१-१२
१५८	,, पृक्षाय	,,	१-१४१-२
१५९	,, तपसि तस्थुषे	,,	७-९-७
१६०	,, वैश्वानराय	,,	१-७९-१
१६१	,, दिवो मूर्ध्ने	,,	८-४४-१६
१६२	,, रोदस्योररतये	,,	१-७९-२
१६३	,, पियाय	,,	१-२६-७
१६४	,, यज्ञानां नाभये	,,	६-७-२

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

१६५	ॐ	अत्रये	नम:	२-८-५
१६६	,,	सते	,,	८-४३-१४
१६७	,,	सिंधूनां जामये	,,	१-६७-७
१६८	,,	आहुताय	,,	२-८-२
१६९	,,	मातरिश्वने	,,	३ २६-२
१७०	,,	वसुधितये	,,	१-१२८-८
१७१	,,	वेधसे	,,	१-६५-१०
१७२	,,	ऊर्ध्वाय	,,	१०-७०-१
१७३	,,	तवसे	,,	३-१-२
१७४	,,	हिताय	,,	१-१२८-७
१७५	,,	अश्विने	,,	७ १-१२
१७६	,,	मूर्णये	,,	१-६६-२
१७७	,,	इनाय	,,	१०-३-१
१७८	,,	वामाय	,,	१०-१२२-१
१७९	ॐ	जनीनां पत्ये	नम:	१-६६-८
१८०	,,	अंतमाय	,,	५-२४-१
१८१	,,	पायवे	,,	६-१५-८
१८२	,,	मर्तेषु मित्राय	,,	१ ६७-१
१८३	,,	अर्याय	,,	४-१-७
१८४	,,	श्रुष्टये	,,	१-६७-१
१८५	,,	साधवे	,,	१-६७-२
१८६	,,	अहये	,,	१-७९-१
१८७	,,	ऋभ्वे	,,	३ ५-६
१८८	,,	भद्राय	,,	१-६७-२
१८९	,,	अजुर्याय	,,	१-६७-१
१९०	,,	हव्यदातये	,,	३-२-८
१९१	,,	चिकित्वते	,,	१-६८-६
१९२	,,	विश्वशुचे	,,	७-१३-१

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

१९३	ॐ पृणते	नमः	१०-१२२-४
१९४	,, शंसाय	,,	४-६-११
१९५	,, संज्ञातरूपाय	,,	१-६९-१
१९६	,, अपां गर्भाय	,,	७-९-३
१९७	,, तुविश्रवस्तमाय	,,	३-११-६
१९८	,, गृध्नवे	,,	१-७०-११
१९९	,, शूराय	,,	१-७०-४
२००	,, सुचन्द्राय	,,	१-७४-६
२०१	,, अश्वाय	,,	१०-१८८-१
२०२	,, अदब्धाय	,,	१-७६-२
२०३	,, वेधस्तमाय	,,	१-७५-२
२०४	,, शिशवे	,,	१०-१-२
२०५	,, वाजश्रवसे	,,	३-२६-५
२०६	,, हर्यमाणाय	,,	३-६-४
२०७	ॐ ईशानाय	नमः	७-१५-१
२०८	,, विश्वचर्षणये	,,	१-२७-९
२०९	,, पुरुप्रशस्ताय	,,	१-७३-२
२१०	,, वाध्र्यश्वाय	,,	१० ६९-१२
२११	,, अनूनवर्चसे	,,	१०-१४६-२
२१२	,, कनिक्रदते	,,	१-१२८-३
२१३	,, हरिकेशाय	,,	३-२-१३
२१४	,, रथिने	,,	३-२-८
२१५	,, मर्याय	,,	१-७७-३
२१६	,, स्वश्वाय	,,	४-२-४
२१७	,, राजते	,,	१-१-८
२१८	,, तुविष्वणये	,,	१ ५८-४
२१९	,, तिग्मजंभाय	,,	१-७९-६
२२०	,, सहस्राक्षाय	,,	१-७९-१२

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

२२१	ॐ तिग्मशोचिषे	नमः	१-२९-१०
२२२	,, द्रुहंतराय	,,	१-१२७-३
२२३	,, ककुदे	,,	८-४४-२
२२४	,, उक्थ्याय	,,	१-७९-१२
२२५	,, विशां गोपे	,,	१-९४-५
२२६	,, मंहिष्ठाय	,,	८-१०३-८
२२७	,, भारताय	,,	२-७-१
२२८	,, मृगाय	,,	१-१४५-५
२२९	,, शतात्मने	,,	१-१४९-३
२३०	,, उरुज्रयसे	,,	७-८-६
२३१	,, वीराय	,,	८-२३-१४
२३२	,, चेकितानाय	,,	३-२१-७
२३३	,, धृतव्रताय	,,	८-६४-२५
२३४	,, तनूरुचे	,,	२-१-९
२३५	ॐ चेतनाय	नमः	२-५-१
२३६	,, अपूर्व्याय	,,	३-१३-५
२३७	,, व्यध्वने	,,	१-१४१-७
२३८	,, चक्रये	,,	३-१६-४
२३९	,, धियावसवे	,,	१-५८-९
२४०	,, विश्वेषुसिन्धुषु-श्रिताय	,,	८-३९-८
२४१	,, अनेहसे	,,	३-९-१
२४२	,, ज्येष्ठाय	,,	८-७४-४
२४३	,, चनोहिताय	,,	३-११-२
२४४	,, अदाभ्याय	,,	१-३१-१०
२४५	,, चोदाय	,,	१-१४३-६
२४६	,, ऋतुपे	,,	३-२०-४
२४७	,, अमृक्ताय	,,	३-११-६

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

२४८	ॐ	शवसस्पत्ये	नमः	१-१४५-१
२४९	,,	गुहासते	,,	१-१४१-३
२५०	,,	वीरुधां गर्भाय	,,	२-१-१४
२५१	,,	सुमेधसे	,,	३-१५-५
२५२	,,	शुष्मिणस्पत्ये	,,	१-१४५-१
२५३	,,	सूप्रदानुवे	,,	१-९६-३
२५४	,,	कवितमाय	,,	३-१४-१
२५५	,,	श्वितानाय	,,	६-६-२
२५६	,,	यज्ञसाधनाय	,,	१-१४५-३
२५७	,,	तुविद्युम्नाय	,,	३-१६-३
२५८	,,	अरुषस्तूपाय	,,	६-२९-३
२५९	,,	विश्वविदे	,,	३-२९-७
२६०	,,	गातुवित्तमाय	,,	८-१०३-१
२६१	,,	श्रुष्टीवते	,,	३-२७-२
२६२	ॐ	श्रोणिदते	नमः	१०-२०-३
२६३	,,	दात्रे	,,	३-१३-३
२६४	,,	पृथुपाजसे	,,	३-५-१
२६५	,,	सहस्कृताय	,,	१-४५-९
२६६	,,	अभिश्रिये	,,	१-९८-१
२६७	,,	सत्यवाचे	,,	७-२-३
२६८	,,	त्वेणाय	,,	१-६६-६
२६९	,,	मात्रोः पुत्राय	,,	३-२ २
२७०	,,	मंहितमाय	,,	१०-११५-६
२७१	,,	घृतयोनये	,,	७-८-६
२७२	,,	दिदृक्षेयाय	,,	३-१-१२
२७३	,,	विश्वदेव्याय	,,	१-१४८-१
२७४	,,	हिरण्ययाय	,,	४-५८-५
२७५	,,	अनुषत्याय	,,	३-२६-१

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

२७६	ॐ	कृष्णजंहये	नमः	१-१४१-७
२७७	,,	शतनीथाय	,,	१०-६९-७
२७८	,,	अप्रतिकुताय	,,	३-२-१४
२७९	,,	इळायास्पुत्राय	,,	३-२९-३
२८०	,,	ईषेन्याय	,,	१-६९-५
२८१	,,	विचेतसे	,,	२-१०-१
२८२	,,	वाघतामुशिजे	,,	३-३-८
२८३	,,	वीताय	,,	४-७-६
२८४	,,	अर्काय	,,	३-१६-७
२८५	,,	मानुषाय	,,	१-४४-१०
२८६	,,	अजस्राय	,,	१७-६-२
२८७	,,	विप्राय	,,	१-१२७-१
२८८	,,	श्रोत्रे	,,	३-२६-२
२८९	,,	उर्विये	,,	२-३५-८
२९०	ॐ	घृषाय	नमः	३-२७-१४
२९१	,,	आयो युवानाय	,,	४-१-११
२९२	,,	आबाधाय	,,	८-२३-३
२९३	,,	वीहुजंभाय	,,	३-८९-१३
२९४	,,	हरिव्रताय	,,	३-३-५
२९५	,,	दिवः केतवे	,,	३-२-१४
२९६	,,	भुवोमूर्ध्ने	,,	१०-८८-६
२९७	,,	सरण्यते	,,	३-१-१९
२९८	,,	दुर्दभाय(दूकभाय)	,,	४-९-२
२९९	,,	सुरुचे	,,	१-१२२-१
३००	,,	दिव्येनशोचिषा-राजते	,,	३-२-४
३०१	,,	सुदीतये	,,	३-२७-१०
३०२	,,	इषिराय	,,	३-२-१४

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

३०३	ॐ बृहते	नमः	१-४५-८
३०४	,, सुदृशीकाय	,,	५-४-२
३०५	,, विशांकेतवे	,,	१०-१५६-५
३०६	,, पुरुहूताय	,,	१-४४-७
३०७	,, उपस्थसदे	,,	१०-१५६-५
३०८	,, पुरोयाव्ने	,,	८-८४-८
३०९	,, पुर्वणीकाय	,,	६-१०-२
३१०	,, अनिवृताय	,,	३-२९-६
३११	,, सत्पतये	,,	२-१-४
३१२	,, द्युमते	,,	२-९-६
३१३	,, यज्ञस्य विदुषे	,,	१०-५३-१
३१४	,, अध्यध्याय	,,	२-३५-५
३१५	,, दुर्वर्तवे	,,	६-६-५
३१६	,, मृर्जयते	,,	१०-४६-५
३१७	ॐ अपदे	नमः	४-१-५
३१८	,, अमृताय	,,	१-२६-९
३१९	,, सौभगस्येशाय	,,	३-१६-१
३२०	,, स्वराज्याय	,,	२-८-६
३२१	,, देवहूतमाय	,,	३-१३-६
३२२	,, कीलालपे	,,	१०-११-१४
३२३	,, वीतिहोत्राय	,,	३-२४-२
३२४	,, घृतनिर्णिजे	,,	३-२७-५
३२५	,, सनश्रुताय	,,	३-११-४
३२६	,, शुचिवर्णाय	,,	७-२ ३
३२७	,, तुविग्रीवाय	,,	५-२-१२
३२८	,, भारत्यै	,,	१-१४२-९
३२९	,, शोचिषस्पत्ये	,,	५-६-५
३३०	,, सोमपृष्ठाय	,,	८-४३-११

२२१	ॐ	तिग्मशोचिषे	नमः	१ २९-१०
२२२	,,	द्रुहंतराय	,,	१-१२७-३
२२३	,,	ककुदे	,,	८-४४ २
२२४	,,	उक्थ्याय	,,	१-७९ १२
२२५	,,	विशां गोपे	,,	१-९४-५
२२६	,,	मंहिष्ठाय	,,	८-१०३ ८
२२७	,,	भारताय	,,	२-७-१
२२८	,,	मृगाय	,,	१-१४५-५
२२९	,,	शतात्मने	,,	१-१४९-३
२३०	,,	उरुज्रयसे	,,	७-८-६
२३१	,,	वीराय	,,	८-२३-१४
२३२	,,	चेकितानाय	,,	३-२१-३
२३३	,,	धृतव्रताय	,,	८-६४-२५
२३४	,,	तनूरुचे	,,	२-१-९
२३५	ॐ	चेतनाय	नमः	२-५-१
२३६	,,	अपूर्व्याय	,,	३-१३-५
२३७	,,	व्यध्वने	,,	१-१४१-७
२३८	,,	चक्रये	,,	३-१६-४
२३९	,,	धियावसवे	,,	१-५८-९
२४०	,,	विश्वेषुसिन्धुषु-श्रिताय	,,	८-३९-८
२४१	,,	अनेहसे	,,	३-९ १
२४२	,,	ज्येष्ठाय	,,	८-७४-४
२४३	,,	चनोहिताय	,,	३-११-२
२४४	,,	अदाभ्याय	,,	१-३१-१०
२४५	,,	चोदाय	,,	१-१४३-६
२४६	,,	ऋतुपे	,,	३-२०-४
२४७	,,	अमृक्ताय	,,	३-११-६

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

२४८	ॐ शवसस्पत्ये	नमः	१-१४५-१	२६२	ॐ श्रोणिदते	नमः	१०-२०-३
२४९	,, गुहासते	,,	१-१४१-३	२६३	,, दात्रे	,,	३-१३-३
२५०	,, वीरुधां गर्भाय	,,	२-१-१४	२६४	,, पृथुपाजसे	,,	३-५-१
२५१	,, सुमेधसे	,,	३-१५-५	२६५	,, सहस्कृताय	,,	१-४५-९
२५२	,, शुष्मिणस्पत्ये	,,	१-१४५-१	२६६	,, अभिश्रिये	,,	१-९८-१
२५३	,, सुप्रदानुवे	,,	१-९६-३	२६७	,, सत्यवाचे	,,	७-२-३
२५४	,, कवितमाय	,,	३-१४-१	२६८	,, त्वेणाय	,,	१-६६-६
२५५	,, श्वितानाय	,,	६-६-२	२६९	,, मात्रोः पुत्राय	,,	३-२ २
२५६	,, यज्ञसाधनाय	,,	१-१४५-३	२७०	,, महिंतमाय	,,	१०-११५-६
२५७	,, तुविद्युम्नाय	,,	३-१६-३	२७१	,, घृतयोनये	,,	७-८-६
२५८	,, अरुषस्तूपाय	,,	६-२९-३	२७२	,, दिदृक्षेयाय	,,	३-१-१२
२५९	,, त्रिश्वविदे	,,	३-२९-७	२७३	,, विश्वदेव्याय	,,	१-१४८-१
२६०	,, गातुवित्तमाय	,,	८-१०३-१	२७४	,, हिरण्ययाय	,,	४-५८-५
२६१	,, श्रुष्टीवते	,,	३-२७-२	२७५	,, अनुषत्याय	,,	३-२६-१

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

२७६	ॐ	कृष्णजंहये	नमः	१-१४१-७
२७७	,,	शतनीथाय	,,	१०-६९-७
२७८	,,	अप्रतिकुताय	,,	३-२-१४
२७९	,,	इळायास्पुत्राय	,,	३-२९-३
२८०	,,	ईषेन्याय	,,	१-६९-५
२८१	,,	विचेतसे	,,	२-१०-१
२८२	,,	वाघतामुशिजे	,,	३-३-८
२८३	,,	वीताय	,,	४-७-६
२८४	,,	अर्काय	,,	३-१६-७
२८५	,,	मानुषाय	,,	१-४४-१०
२८६	,,	अजस्राय	,,	१७-६-२
२८७	,,	विप्राय	,,	१-१२७-१
२८८	,,	श्रोत्ते	,,	३-२६-२
२८९	,,	उर्विये	,,	२-३५-८
२९०	ॐ	वृषाय	नमः	३-२७-१४
२९१	,,	आयो युवानाय	,,	४-१-११
२९२	,,	आबाधाय	,,	८-२३-३
२९३	,,	वीहुजंभाय	,,	३-८९-१३
२९४	,,	हरित्रिताय	,,	३-३-५
२९५	,,	दिवः केतवे	,,	३-२-१४
२९६	,,	भुवोमूर्ध्ने	,,	१०-८८-६
२९७	,,	सरण्यते	,,	३-१-१९
२९८	,,	दुर्दभाय(दूकभाय)	,,	४-९-२
२९९	,,	शुरुचे	,,	१-१२२-१
३००	,,	दिन्येनशोचिषा-राजते	,,	३-२-४
३०१	,,	सुदीतये	,,	३-२७-१०
३०२	,,	इषिराय	,,	३-२-१४

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

३०३	ॐ बृहते	नमः	१-४५-८
३०४	,, सुदृशीकाय	,,	५-४-२
३०५	,, विशांकेतवे	,,	१०-१५६-५
३०६	,, पुरुहूताय	,,	१-४४-७
३०७	,, उपस्थसदे	,,	१०-१५६-५
३०८	,, पुरोयाव्ने	,,	८-८४-८
३०९	,, पुर्वणीकाय	,,	६-१०-२
३१०	,, अनिवृताय	,,	३-२९-६
३११	,, सत्पतये	,,	२-१-४
३१२	,, द्युमते	,,	२-९-६
३१३	,, यज्ञस्य विदुषे	,,	१०-५३-१
३१४	,, अन्यथ्याय	,,	२-३५-५
३१५	,, दुर्वर्तवे	,,	६-६-५
३१६	,, मूर्जयते	,,	१०-४६-५
३१७	ॐ अपदे	नमः	४-१-५
३१८	,, अमृताय	,,	१-२६-९
३१९	,, सौभगस्येशाय	,,	३-१६-१
३२०	,, स्वराज्याय	,,	२-८-६
३२१	,, देवहूतमाय	,,	३-१३-६
३२२	,, कीलालपे	,,	१०-११-१४
३२३	,, वीतिहोत्राय	,,	३-२४-२
३२४	,, घृतनिर्णिजे	,,	३-२७-५
३२५	,, सनश्रुताय	,,	३-११-४
३२६	,, शुचिवर्णाय	,,	७-२-३
३२७	,, तुविग्रीवाय	,,	५-२-१२
३२८	,, भारत्यै	,,	१-१४२-९
३२९	,, शोचिषस्पत्ये	,,	५-६-५
३३०	,, सोमपृष्ठाय	,,	८-४३-११

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

३३१	ॐ	हिरिश्मश्रवे	नमः	५-७-७
३३२	,,	भद्रशोचिषे	,,	५-४-७
३३३	,,	जुगुर्वणये	,,	१-१४२-८
३३४	,,	ऋत्विजे	,,	१-१-१
३३५	,,	पूर्वेभिर्ऋषिभिरीड्याय	,,	१-१-२
३३६	,,	चित्रश्रवस्तमाय	,,	१-१.५
३३७	,,	भीमाय	,,	१-७०-४
३३८	,,	स्तियानां वृषभाय	,,	७-५-२
३३९	,,	नूतनैरीड्याय	,,	१-१-२
३४०	,,	आसुराय	,,	३-२९-११
३४१	,,	स्तभूयमानाय	,,	३-७-४
३४२	,,	अध्वराणां गोपे	,,	१-१-८
३४३	,,	विश्पतये	,,	१-२२-२
३४४	ॐ	अस्मयवे	नमः	६-४८-२
३४५	,,	ऋतस्यगोपे	,,	१०-११८ ७
३४६	,,	जीराश्वाय	,,	१-१४१-१२
३४७	,,	जोहूत्राय	,,	२-१०-१
३४८	,,	दंपतये	,,	१-१२७-८
३४९	,,	कवये	,,	१-१२-६
३५०	,,	ऋतजाताय	,,	१-३६-१९
३५१	,,	द्युक्षवचसे	,,	६-१५-४
३५२	,,	जुह्वास्याय	,,	१-१२-६
३५३	,,	अमीवचातनाय	,,	१-१२-७
३५४	,,	सोमगोपे	,,	१०-४५-५
३५५	,,	शुक्रशोचिषे	,,	२-२-३
३५६	,,	घृताहवनाय	,,	१-१२-५
३५७	,,	आयजये	,,	८-२३-१

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

३५८	ॐ	असन्दिताय	नमः	४-४-२
३५९	,,	सत्यधर्मणे	,,	१-१२-७
३६०	,,	शशमानाय	,,	१०-१४२-६
३६१	,,	शुशुक्वनये	,,	८-२३-५
३६२	,,	वातजूताय	,,	१-५८-४
३६३	,,	विश्वरूपाय	,,	१-१३-१०
३६४	,,	त्वष्ट्रे	,,	२-१-५
३६५	,,	चारुतमाय	,,	५-१-९
३६६	,,	महते	,,	१-२७-११
३६७	,,	इळायै	,,	१-१४२-१
३६८	,,	सरस्वत्यै	,,	२-१-११
३६९	,,	हर्षते	,,	१-१२७-६
३७०	,,	तिसृभ्यो देवीभ्यो	,,	१-१३-९
३७१	,,	मयोभूभ्यो	,,	१-१३-९
३७२	ॐ	अर्वते	नमः	६-१२-६
३७३	,,	सुपेशोभ्यां	,,	१-१३-७
३७४	,,	दैवीभ्यां होतृभ्यां	,,	१-१३-८
३७५	,,	स्वर्पतये	,,	८-४४-१८
३७६	,,	सुभासे	,,	८-२३-२०
३७७	,,	देवीभ्यो द्वार्भ्यो	,,	१-१३-६
३७८	,,	जराबोधाय	,,	१-२७-१०
३७९	,,	हूयमानाय	,,	१०-१२२-५
३८०	,,	विभावसवे	,,	१-४४-१०
३८१	,,	सहसावते	,,	१-१८९-५
३८२	,,	मर्मृजेन्याय	,,	२-१०-१
३८३	,,	हिंस्राय	,,	१०-८७-३
३८४	,,	अमृतस्य रक्षित्रे	,,	६-७-७
३८५	,,	द्रविणोदसे	,,	२-१-७

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

३८६	ॐ	भ्राजमानाय	नमः	९-५-१०
३८७	,,	धृष्णवे	,,	३-१६-२२
३८८	,,	ऊर्जां पत्ये	,,	१-२६-१
३८९	,,	पित्रे	,,	१-३१-१०
३९०	,,	सदायविष्ठाय	,,	१-२६-२
३९१	,,	वरुणाय	,,	१-२-४
३९२	,,	वरेण्याय	,,	१-२६-२
३९३	,,	भाजयवे	,,	२-१-४
३९४	,,	पृथवे	,,	२-१०-४
३९५	,,	वन्याय	,,	१-३१-२
३९६	,,	अध्वराणां सम्राजते	,,	१-२७-१
३९७	,,	सुशेवाय	,,	१-२७-२
३९८	,,	धिये	,,	१-९५-८
३९९	ॐ	ऋषये	नमः	३-२१-३
४००	,,	शिवाय	,,	१-३१-१
४०१	,,	पृथुप्रगाम्ने	,,	१-२७-२
